# Ṛgveda 10.129

## Samhitā

नासदासीन्नो सदासीत्तदानीं नासीद्रजो नो व्योमा परो यत्।
किमावरीवः कुह कस्य शर्मन्नम्भः किमासीद्गहनं गभीरम् ॥१॥
न मृत्युरासीदमृतं न तर्हि न रात्र्या अह्न आसीत्प्रकेतः।
आनीदवातं स्वधया तदेकं तस्माद्धान्यन्न परः किं चनास ॥२॥
तम आसीत्तमसा गूळ्हमग्रे ऽप्रकेतं सलिलं सर्वमा इदम्।
तुच्छ्येनाभ्वपिहितं यदासीत्तपसस्तन्महिनाजायतैकम ॥३॥
कामस्तदग्रे समवर्तताधि मनसो रेतः प्रथमं यदासीत्।
सतो बनधुमसति निरविन्दन्हृदि प्रतीष्या कवयो मनीषा ॥४॥
तिरश्चीनो विततो रश्मिरेषामधः स्विदासी३दुपरि स्विदासी३त्।
रेतोधा आसन्महिमान आसन्त्स्वधा अवस्तात्प्रयतिः परस्तात् ॥५॥
को अद्धा वेद क इह प्र वोचत्कुत आजाता कुत इयं विसृष्टिः ।
अर्वाग्देवा अस्य विसर्जनेनाथा को वेद यत आबभूव ॥६॥
इयं विसृष्टिर्यत आबभूव यदि वा दधे यदि वा न ।
यो अस्याध्यक्षः परमे व्योमन्सो अङ्ग वेद यदि वा न वेद ॥७॥

## Padapātha

न असत् आसीत् नो सत् आसीत् तदानीं न आसीत् रजः नो विऽओमा परः यत्।
किं आ अवरीवः कुह कस्य शर्मन् अम्भः किं आसीत् गहनं गभीरम् ॥१॥
न मृत्युः आसीत् अमृतं न तर्हि न रात्र्याः अह्नः आसीत् प्रऽकेतः।
आनीत् अवातं स्वधया तत् एकं तस्मात् अन्यत् न परः किं चन आस ॥२॥
तमः आसीत् तमसा गूळ्हं अग्रे अप्रकेतं सलिलं सर्वं आः इदम्।
तुच्छ्येन आभु अपिऽहितं यत् आसीत् तपसः तत् महिना अजायत एकम् ॥३॥
कामः तत् अग्रे सं अवर्तत अधि मनसः रेतः प्रथमं यत् आसीत्।
सतः बनधुं असति निः अविन्दत् हृदि प्रतिऽइष्य कवयः मनीषा ॥४॥
तिरश्चीनः विऽततः रश्मिः एषां अधः स्वित् आसी३त् उपरि स्वित् आसी३त्।
रेतःऽधाः आसन् महिमानः आसन् स्वधा अवस्तात् प्रऽयतिः परस्तात् ॥५॥
कः अद्धा वेद कः इह प्र वोचत् कुतः आऽजाता कुतः इयं विऽसृष्टिः ।
अर्वाक् देवाः अस्य विऽसर्जनेन अथ कः वेद यतः आऽबभूव ॥६॥
इयं विऽसृष्टिः यतः आऽबभूव यदि वा दधे यदि वा न ।
यः अस्य अधिऽअक्षः परमे विऽओमन् सः अङ्ग वेद यदि वा न वेद ॥७॥